स्मृता आकारादिभिश्चान्यथासिद्धापत्तेः। तस्मात्सा जातिरेव वाचिका तादात्म्येनावच्छेदिका चेति। ननु सरोरस इत्यादौ जात्योः सत्त्वादर्थभेदबोधो न स्यादित्यत आह औपाधिको वेति। वा त्वर्थे उपाधिरानुपूर्वी सैव जातिविशेषाभिव्यञ्जिकेति भेदः कारणीभूतज्ञानस्येति नातिप्रसङ्ग इति भावः। उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टान्तमाह वर्णानामिति। ननु जातेः प्रत्येकं वर्णेष्वपि सत्त्वात् प्रत्येकादर्थबोधः स्यादित्यत आह। "अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता। कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः।" अनेकाभिर्वर्णव्यक्तिभिरभिव्यङ्ग्यैव जातिः स्फोट इति स्मृता योगार्थतया बोधिकेति यावत्। एतेन स्फोटस्य नित्यत्वात्सर्वार्थबोधापत्तिरित्यपास्तम्। अयं भावः यद्यपि वर्णस्फोटपक्षे कथितदोषोऽस्ति तथापि पदवाक्यपक्षयोर्न, तत्र तस्या व्यासज्यवृत्तित्वस्य धर्मिग्राहकमानसिद्धत्वादिति। कैश्चिद्व्यक्तयोध्वनय एव ध्वनिवर्णयोर्भेदाभावादित्यभ्युपेयन्त इति शेषार्थः। उक्तं हि काव्यप्रकाशे "बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकशब्दस्य ध्वनिरिति व्यवहारः कृतः" इति।

ननु का सा जातिस्तत्राह। "सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ। सत्यं यत्तत्र सा जातिरसत्या व्यक्तयोमताः।" प्रतिभावम् प्रतिपदार्थम्। सत्यांशो जातिः असत्या व्यक्तयः। तत्तद्व्यक्तिविशिष्टं ब्रह्मैव जातिरिति भावः। उक्तञ्च कैयटेन "असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थं इति"। "ब्रह्मतत्त्वमेव शब्दस्वरूपतया भातीति" च। कथं तर्हि ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्त्वादनित्यत्वम्, आत्मैवेदं सर्वमिति श्रुतिवचनादिति कैयटः सङ्गच्छताम् अविद्या आविद्यिको धर्मविशेषोवेति पक्षान्तरमादायेति द्रष्टव्यम्"।

**जातिस्मर** पु॰ जातिः स्मर्य्यतेऽत्र स्नानादिना स्मृ—आधारे बा॰अप्। १तीर्थभेदे "ततो देवह्रदेऽरण्ये कृष्णवेनाजलोद्भवे। जातिस्मरह्रदे स्नात्वा भवेज्जातिस्मरो नरः" भा॰ व॰८५ अ॰। जातिं पूर्वजन्मवृत्तान्तं स्मरति स्मृ—अच्। २पूर्वजन्मवृत्तान्तस्मारके त्रि॰। तत् स्मरणहेतुकर्म च मनुनोक्तं यथा "वेदाभ्यासेन सततं शौचेन तपसैव च। अद्रोहेण च भूतानां जातिं स्मरति पौर्व्विकीम्"। "शुभेन कर्मणा तेन जाता जातिस्मरा मृगाः। त्रासानुत्पाद्य संविग्नारम्ये कालञ्जरे गिरौ" हरिवं २१ अ॰।

**जाती** स्त्री जन—क्तिच् वा ङीप्। मालत्यां पुष्पप्रधानवृक्षे अमरः। पुष्पेऽपि स्त्री "पुष्पे जातीप्रभृतयः स्वलिङ्गाः" इत्यमरोक्तेः। "जातिर्जाती च सुमना मालती राजपुत्रिका। चेतिका हृद्यगन्धा च सा पीता स्वर्णजातिका। जातीयुगं च तिक्तोष्णं तुवरं लघु दोषजित्। शिरोक्षिमुखदन्तार्त्ति विषकुष्ठानिलास्रजित्" भावप्र॰। "तत् कुड्मलं नेत्ररोगव्रणविस्फोटकुष्ठहृत्" राजनि॰।

**जातीय** त्रि॰ जातौ भवः छ। जातिभवे। अस्य किञ्चिदुपपदादेव प्रयोगः सजातीयः विजातीयः तुल्यजातीयः।

**जातु** अव्य॰ जै—क्षये जन—वा बा॰ क्तुन्। १कदाचिदित्यर्थे अमरः। "मनस्तु यं नोज्झति जातु यातु मनोरथः कण्ठपथं कथं सः" नैष॰। "न जातु वैनायकमेकमुद्धृतम्" माघः। "न जातु कामः कामानामुपभोगेन शाम्यति" मनुः २सम्भावनायां ३गर्हायाञ्च शब्दर॰। गर्हार्थकेन जातुशब्देन योगे अन्यलकारबाधेन सर्वत्र लट्। "जातु निन्दसि गोविन्दमपि निन्दसि शङ्करम्" मुग्ध॰। "जातु तत्रभवान् वृषलं याजयति"।

**जातुक** न॰ जातु गर्हितं कं जलमस्मात्। हिङ्गुनि शब्दच॰

**जातुधान** न॰ जातु गर्हितं धानमभिधानमस्य। यातुधाने राक्षसे अमरटीकायां रमानाथः।

**जातुष** त्रि॰ जतुनो विकारः अण् सुक् च। जतुनिर्मिते। "यदाऽश्रौषं जातुषाद्वेश्मनस्तान्" भाः आ॰ १२ अ॰।

**जातू** पु॰जन-ड जान् तूर्वति हिनस्ति तूर्व—क्विप् पूर्वपददीर्घः। वज्रे। "स जातूभर्मा श्रद्दधानः" ऋ॰१।१०३।२। "जातू इत्यशनिमाचक्षते" भा॰। व्युत्पत्तिस्तथैवोक्ता।

**जातूकर्ण** पु॰ ऋषिभेदे। स च अष्टाविंशतितमे द्वापरयुगे जातः यथोक्तं हरिवं॰ ४२अ॰ "नवमे द्वापरे विष्णोरष्टाविंशे पुराऽभवत्। वेदव्यासस्तथा जज्ञे जातूकर्ण्य पुरःसरः" स च उपस्मृतिकर्त्ता यथोक्तं हेमा॰ दा॰ ख॰ अङ्गिरसा "जाबालिर्नाचिकेतश्च स्कान्दो लौगाक्षि कश्यपौ। व्यासः सनत्कुमारश्च शतद्रुर्जनकस्तथा। व्याघ्रः कात्यायनश्चैव जातूकर्ण्यः कपिञ्जलः। बौधायनः कणादश्च विश्वामित्रस्तथैव च। उपस्मृतय इत्येताः प्रवदन्ति मनीषिणः"। ततो गर्गा॰ अपत्ये यञ्। जातूकर्ण्य तदपत्ये पुंस्त्री। स्त्रियां ङीप् यलोपौ। जातूकर्णी।

**जातूष्ठिर** त्रि॰ जातु कदाचित् स्थिरः वेदे बा॰ षत्वं पृषो॰ दीर्घश्च। सर्वदास्थिरे। "जातूष्ठिरस्य प्रवयः सहस्वतः"